# Adbhuta Anjaneya Stavaraja



ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि स्तोत्रं सर्वशुभावहम् ।
सर्वकामप्रदं नृणां हनुमत्स्तोत्रमुत्तमम् ॥

तप्तहाटकसङ्काशं नानापुष्पविभूषितम् ।
उद्यद्बालार्कवदनं त्रिनेत्रं कुण्डलोज्ज्वलम् ॥
मौंजीकौपीनसंयुक्तं हेमयज्ञोपवीतिनम् ।
पिङ्गलाक्षं महाकायं टङ्कशैलेन्द्रधारिणम् ॥
शिखानिक्षिप्तवालाग्रमेरुशैलाग्रसंस्थितम् ।
मूर्तित्रयात्मकं वीरं महाशौर्यं महाहनुम् ।
हनूमन्तं वायुसुतं नमामि ब्रह्मचारिणम् ॥

त्रिवर्णाक्षरमन्त्रस्थं जपाकुसुमसन्निभम् ।
नानाभूषणसंयुक्तं आञ्जनेयं नमाम्यहम् ॥
पञ्चाक्षरस्थितं देवं नीलनीरदसन्निभम् ।
पूजितं सर्वदेवैस्तु राक्षसारिं नमाम्यहम् ॥

अचलद्युतिसङ्काशं सर्वालङ्कारभूषितम् ।
षडक्षरस्थितं देवं नमामि ब्रह्मचारिणम् ॥
सप्तवर्णमयं देवं हरिद्राभं सुरार्चितम् ।
सुन्दरास्याब्जसंयुक्तं त्रिनेत्रं तं नमाम्यहम् ॥
अष्टाक्षराधिपं देवं क्षीरवर्णं महाहनुम् ।
नमामि जगतां वन्द्यं लङ्काप्राकारदाहकम् ॥
अतसीपुष्पसङ्काशं दशवर्णात्मकं विभुम् ।
जटाधरं चतुर्बाहुं नमामि कपिनायकम् ॥
द्वादशाक्षरमन्त्रस्य नायकं कुन्तधरिणम् ।
अङ्कुशं च दधानं तं कपिवर्यं नमाम्यहम् ॥
त्रयोदशाक्षरयुतं सीतादुःखनिवारणम् ।
हेमवर्णं लसत्कायं भजे सुग्रीवमन्त्रिणम् ॥
मालामन्त्रात्मकं देवं चित्रवर्णं चतुर्भुजम् ।
पाशाङ्कुशाऽभयकरं धृतटङ्कं नमाम्यहम् ॥

अक्षादिराक्षसहरं दशकण्ठदर्प-
निर्मूलनं रघुवरांघ्रिसरोजभक्तम् ।
सीताविशोकघनदुःखमहान्धकार
निर्वापणे शिशिरभानुमहं नमामि ॥

मां पश्य पश्य दयया निजदृष्टिपातैः
मां रक्ष रक्ष परितो रिपुदुःखपुञ्जात् ।
वश्यं कुरु त्रिजगतां मनुजेश्वराणां
मे देहि देहि महतीं वसुधां श्रियं च ॥

आपद्भ्यो रक्ष सर्वत्र आञ्जनेय नमोऽस्तुते ।
बन्धनं च्छेदयाशु त्वं कपिवर्य नमोऽस्तुते ॥
उच्चाटय रिपून्सर्वान् मोहनं भूभुजं कुरु ।
विद्वेषिणो मारय त्वं त्रिमूर्त्यात्मक सर्वदा ॥
देहि मे संपदं नित्यं त्रिलोचन नमोऽस्तुते ।
दुष्टरोगान् जहि जहि रामदूत नमोऽस्तुते ॥

सञ्जीवपर्वतोद्धार मम दुःखं निवारय ।
ज्वरानुपद्रवान्सर्वान् नाशय त्वं कपीश्वर ॥

हाहाकारमुखान्तनिर्यदनिलज्वालासमूहोज्ज्वलं
विद्युत्खण्डसुजातधूम्रवपुषस्वच्छाट्टहासं विभुम् ।
सच्चूर्णीकृतधूम्रलोचनमुखाद्यक्षीणरक्षोबलं
तं वन्द्यात्सुरचारणासुरवरैर्वन्द्यं समीरात्मजम् ॥

एवं ध्यायन्नरो नित्यं सर्वपापैः प्रमुच्यते ।
प्रयाणे चिन्तितस्सिद्धिः शीघ्रमेव न संशयः ॥
अष्टम्यां तु चतुर्दश्यां अर्कवारे विशेषतः ।
सन्ध्यापूजां प्रकुर्वीत द्वादश्यां तु विशेषतः ॥
अर्कमूलेन कुर्वीत हनुमत्प्रतिमां सुधीः ।
पूजयेत्तत्र विद्वांसो रक्तवस्त्रेण वेष्टयेत् ॥
ब्राह्मणान्भोजयेत्पश्चात्पूजां हनुमतो नरः ।
न शस्त्रभयमाप्नोति भयं वाऽप्यन्तरिक्षगम् ॥

एवं स्तुत्वा हनूमन्तं नरः श्रद्धासमन्वितः ।
पुत्रपौत्रादि सहितः सर्वसौक्यमवाप्नुयात् ॥

॥ इति शिवम् ॥

īśvara uvāca
śṛṇu devi pravakṣyāmi stotraṃ sarvaśubhāvaham ।
sarvakāmapradaṃ nṝṇāṃ hanumatstotramuttamam ॥

taptahāṭakasaṅkāśaṃ nānāpuṣpavibhūṣitam ।
udyadbālārkavadanaṃ trinetraṃ kuṇḍalojjvalam ॥
mauṃjīkaupīnasaṃyuktaṃ hemayajnopavītinam ।
piṅgalākṣaṃ mahākāyaṃ ṭaṅkaśailendradhāriṇam ॥
śikhānikṣiptavālāgrameruśailāgrasaṃsthitam ।
mūrtitrayātmakaṃ vīraṃ mahāśauryaṃ mahāhanum ।
hanūmantaṃ vāyusutaṃ namāmi brahmacāriṇam ॥

trivarṇākṣaramantrasthaṃ japākusumasannibham |
nānābhūṣaṇasaṃyuktaṃ āñjaneyaṃ namāmyaham ||
pancākṣarasthitaṃ devaṃ nīlanīradasannibham |
pūjitaṃ sarvadevaistu rākṣasāriṃ namāmyaham ||
acaladyutisaṅkāśaṃ sarvālaṅkārabhūṣitam |
ṣaḍakṣarasthitaṃ devaṃ namāmi brahmacāriṇam ||
saptavarṇamayaṃ devaṃ haridrābhaṃ surārcitam |
sundarāsyābjasaṃyuktaṃ trinetraṃ taṃ namāmyaham ||
aṣṭākṣarādhipaṃ devaṃ kṣīravarṇaṃ mahāhanum |
namāmi jagatāṃ vandyaṃ laṅkāprākāradāhakam ||
atasīpuṣpasaṅkāśaṃ daśavarṇātmakaṃ vibhum |
jaṭādharaṃ caturbāhuṃ namāmi kapināyakam ||
dvādaśākṣaramantrasya nāyakaṃ kuntadhariṇam |
aṅkuśaṃ ca dadhānaṃ taṃ kapivaryaṃ namāmyaham ||
trayodaśākṣarayutaṃ sītāduḥkhanivāraṇam |
hemavarṇaṃ lasatkāyaṃ bhaje sugrīvamantriṇam ||
mālāmantrātmakaṃ devaṃ citravarṇaṃ caturbhujam |
pāśāṅkuśā.abhayakaraṃ dhṛtaṭaṅkaṃ namāmyaham ||

akṣādirākṣasaharaṃ daśakaṇṭhadarpa-
nirmūlanaṃ raghuvarāṃghrisarojabhaktam |
sītāviśokaghanaduḥkhamahāndhakāra
nirvāpaṇe śiśirabhānumahaṃ namāmi ||

māṃ paśya paśya dayayā nijadṛṣṭipātaiḥ
māṃ rakṣa rakṣa parito ripuduḥkhapunjāt |
vaśyaṃ kuru trijagatāṃ manujeśvarāṇāṃ
me dehi dehi mahatīṃ vasudhāṃ śriyaṃ ca ||

āpadbhyo rakṣa sarvatra ānjaneya namo.astute |
bandhanaṃ cchedayāśu tvaṃ kapivarya namo.astute ||
uccāṭaya ripūnsarvān mohanaṃ bhūbhujaṃ kuru |
vidveṣiṇo māraya tvaṃ trimūrtyātmaka sarvadā ||
dehi me saṃpadaṃ nityaṃ trilocana namo.astute |
duṣṭarogān jahi jahi rāmadūta namo.astute ||
sanjīvaparvatoddhāra mama duḥkhaṃ nivāraya |
jvarānupadravānsarvān nāśaya tvaṃ kapīśvara ||

hāhākāramukhāntaniryadanilajvālāsamūhojjvalaṃ
vidyutkhaṇḍasujātadhūmravapuṣasvacchāṭṭahāsaṃ vibhum |

saccūrṇīkṛtadhūmralocanamukhādyakṣīṇarakṣobalaṃ
taṃ vandyātsuracāraṇāsuravarairvandyaṃ samīrātmajam ||

evaṃ dhyāyannaro nityaṃ sarvapāpaiḥ pramucyate |
prayāṇe cintitassiddhiḥ śīghrameva na saṃśayaḥ ||
aṣṭamyāṃ tu caturdaśyāṃ arkavāre viśeṣataḥ |
sandhyāpūjāṃ prakurvīta dvādaśyāṃ tu viśeṣataḥ ||
arkamūlena kurvīta hanumatpratimāṃ sudhīḥ |
pūjayettatra vidvāṃso raktavastreṇa veṣṭayet ||
brāhmaṇānbhojayetpaścātpūjāṃ hanumato naraḥ |
na śastrabhayamāpnoti bhayaṃ vā.apyantarikṣagam ||
evaṃ stutvā hanūmantaṃ naraḥ śraddhāsamanvitaḥ |
putrapautrādi sahitaḥ sarvasaukyamavāpnuyāt ||

|| iti śivam ||

www.kamakotimandali.com